श्रीहनुमत्स्तोत्रम् व्यासतीर्थविरचितम्

{॥ श्रीहनुमत्स्तोत्रम् व्यासतीर्थविरचितम् ॥}

नमामि दूतं रामस्य सुखदं च सुरद्रुमम् ।

पीनवृत्तमहाबाहुं सर्वशत्रुनिबर्हणम् ॥ १॥

नानारत्नसमायुक्तकुण्डलादिविभूषितम् ।

सर्वदाभीष्टदातारं सतां वै दृढमाहवे ॥ २॥

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा ।

तुङ्गाम्भोधितरङ्गस्य वातेन परिशोभिते ॥ ३॥

नानादेशागतैः सद्भिः सेव्यमानं नृपोत्तमैः ।

धूपदीपादिनैवेद्यैः पञ्चखाद्यैश्च शक्तितः ॥ ४॥

भजामि श्रीहनूमन्तं हेमकान्तिसमप्रभम् ।

व्यासतीर्थयतीन्द्रेण पूजितं प्रणिधानतः ॥ ५॥

त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः ।

वांछितं लभतेऽभीष्टं षण्मासाभ्यन्तरे खलु ॥ ६॥

पुत्रार्थी लभते पुत्रं यशोऽर्थी लभते यशः ।

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ ७॥

सर्वथा मास्तु सन्देहो हरिः साक्षी जगत्पतिः ।

यः करोत्यत्र सन्देहं स याति निरयं ध्रुवम् ॥ ८॥

इति श्रीव्यासतीर्थविरचितम् हनुमत्स्तोत्रं सम्पूर्णम् ।

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Hanumath Stotram 5 (By Vyasa Theertha) Lyrics in Devanagari PDF
% File name : hanumatstotraMvyAsatIrtha.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 18, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.

% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website